॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ९४

तमापतन्तं सहसा स्वनवन्तं महाध्वजम् ।
रथं राक्षसराजस्य नरराजो ददर्श ह ॥१॥

कृष्णवाजिसमायुक्तं युक्तं रौद्रेण वर्चसा ।
तडित्पताकागहनं दर्शितेन्द्रायुधायुधम् ।
शरधारा विमुञ्चन्तं धारासारमिवाम्बुदम् ॥२॥

तं दृष्ट्वा मेघसङ्काशमापतन्तं रथं रिपोः ।
गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृशस्वनम् ।
उवाच मातलिं रामः सहस्राक्षस्य सारथिम् ॥३॥

मातले पश्य संरब्धमापतन्तं रथं रिपोः ।
यथापसव्यं पतता वेगेन महता पुनः ।
समरे हन्तुमात्मानं तथानेन कृता मतिः ॥४॥

तदप्रमादमातिष्ठ प्रत्युद्गच्छ रथं रिपोः ।
विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम् ॥५॥

अविक्लवमसम्भ्रान्तमव्यग्रहृदयेक्षणम् ।
रश्मिसञ्चारनियतं प्रचोदय रथं द्रुतम् ॥६॥

कामं न त्वं समाधेयः पुरन्दररथोचितः ।
युयुत्सुरहमेकाग्रः स्मारये त्वां न शिक्षये ॥७॥

परितुष्टः स रामस्य तेन वाक्येन मातलिः ।
प्रचोदयामास रथं सुरसारथिसत्तमः ॥८॥

अपसव्यं ततः कुर्वन्रावणस्य महारथम् ।
चक्रोत्क्षेपेण रजसा रावणं व्यधूनयत् ॥९॥

ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः ।
रथप्रतिमुखं रामं सायकैरवधूनयत् ॥१०॥

धर्षणामर्षितो रामो धैर्यं रोषेण लङ्घयन् ।
जग्राह सुमहावेगमैन्द्रं युधि शरासनम् ।
शरांश्च सुमहातेजाः सूर्यरश्मिसमप्रभान् ॥११॥

तदुपोढं महद्युद्धमन्योन्यवधकाङ्क्षिणोः ।
परस्पराभिमुखयोर्दृप्तयोरिव सिंहयोः ॥१२॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः ।
समीयुर्द्रष्टुं रथं रावणक्षयकाङ्क्षिणः ॥१३॥

समुत्पेतुरथोत्पाता दारुणा लोमहर्षणाः ।
रावणस्य विनाशाय राघवस्य जयाय च ॥१४॥

ववर्ष रुधिरं देवो रावणस्य रथोपरि ।
वाता मण्डलिनस्तीव्रा अपसव्यं प्रचक्रमुः ॥१५॥

महद्गृध्रकुलं चास्य भ्रममाणं नभस्तले ।
येन येन रथो याति तेन तेन प्रधावति ॥१६॥

सन्ध्यया चावृता लङ्का जपापुष्पनिकाशया ।
दृश्यते सम्प्रदीतेव दिवसेऽपि वसुन्धरा ॥१७॥

सनिर्घाता महोल्काश्च सम्प्रचेतुर्महास्वनाः ।
विषादयन्त्यो रक्षांसि रावणस्य तदाहिताः ॥१८॥

रावणश्च यतस्तत्र प्रचचाल वसुन्धरा ।
रक्षसां च प्रहरतां गृहीता इव बाहवः ॥१९॥

ताम्राः पीताः सिताः श्वेताः पतिताः सूर्यरश्मयः ।
दृश्यन्ते रावणस्याङ्गे पर्वतस्येव धातवः ॥२०॥

गृध्रैरनुगताश्चास्य वमन्त्यो ज्वलनं मुखैः ।
प्रणेदुर्मुखमीक्षन्त्यः संरब्धमशिवं शिवाः ॥२१॥

प्रतिकूलं ववौ वायू रणे पांसून्समुत्किरन् ।
तस्य राक्षसराजस्य कुर्वन्दृष्टिविलोपनम् ॥२२॥

निपेतुरिन्द्राशनयः सैन्ये चास्य समन्ततः ।
दुर्विषह्य स्वना घोरा विना जलधरस्वनम् ॥२३॥

दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृताः ।
पांसुवर्षेण महता दुर्दर्शं च नभोऽभवत् ॥२४॥

कुर्वन्त्यः कलहं घोरं सारिकास्तद्रथं प्रति ।

निपेतुः शतशस्तत्र दारुणा दारुणस्वनाः ॥ २५ ॥

जघनेभ्यः स्फुलिङ्गांश्च नेत्रेभ्योऽश्रूणि सन्ततम् ।
मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च ॥ २६ ॥

एवं प्रकारा बहवः समुत्पाता भयावहाः ।
रावणस्य विनाशाय दारुणाः सम्प्रजज्ञिरे ॥ २७ ॥

रामस्यापि निमित्तानि सौम्यानि च शिवानि च ।
बभूवुर्जयशंसीनि प्रादुर्भूतानि सर्वशः ॥ २८ ॥

ततो निरीक्ष्यात्मगतानि राघवो
रणे निमित्तानि निमित्तकोविदः ।
जगाम हर्षं च परां च निर्वृतिं
चकार युद्धेऽभ्यधिकं च विक्रमम् ॥ २९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com